# Teacher Day Celebration (05-09-2019)

On 5 September 2019, Teacher's Day was celebrated at the University Campus on the occasion of the birth anniversary of Dr.Sarvapalli Radhakrishnan. Swami Adhyatmanand attended the program as the chief guest andpresentedspecial lecture on 'Guru- Shishya Tradition'.

## सोत्साहं समाचरितः शिक्षकदिवसः

प्रतिवर्षं सितम्बरमासस्य पञ्चमे दिनाङ्के समग्रे भारते डॉ. सर्वपल्लीराधाकृष्णनवर्यस्य जन्मदिवसः शिक्षकदिवसत्वेन समाचर्यते। गुरुशिष्ययोः भवति कश्चन अपूर्वः सम्बन्धः। एतादृशस्य गुरुशिष्यसम्बन्धस्य अभिव्यक्तीकरणाय श्रीसोमनाथसंस्कृतविश्वविद्यालये अयं शिक्षकदिवसः अपूर्वतया समाचरितः ऐषमः। अस्मिन् दिने गुरुशिष्यसम्बन्धविषये विशिष्टव्याख्यानाय समागतः आसीत् दिव्यजीवनसङ्घ-शिवानन्दाश्रमात् स्वामी अध्यात्मानन्दः। विश्वविद्यालयस्य सभागारे प्रातः पादोनैकादशवादनतः सार्धद्वादशवादनं यावत् स्वामिनः अध्यात्मानन्दस्य विशिष्टं व्याख्यानम् अभूत्। अस्मिन् व्याख्याने विश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रः, कुलसचिवः डॉ. दशरथजादवः, अनुस्नातकविभागाध्यक्षा प्रो. अर्चना दुबे, संस्कृतमहाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारपण्ड्या, वेदविभागाध्यक्षः प्रो. महेन्द्रकुमार-दवे, अन्ये सहाचार्याः, सहायकाचार्याः, विश्वविद्यालयस्य अधिकारिणः, कर्मचारिणः, अन्तेवासिनश्च समुपातिष्ठन्।



स्वामिनः अध्यात्मानन्दस्य स्वागतं कुर्वन् कुलपतिः प्रो. मिश्रः

कार्यक्रमस्य आरम्भे कुलपतिना विश्वविद्यालयस्य परम्परानुसारं पादपप्रदानेन स्वामिनः अध्यात्मानन्दस्य स्वागतं व्यधायि। तदनु स्वामिना स्वकीयस्य व्याख्यानस्य आरम्भः वैदिकैः मन्त्रैः कृतः। तेनोक्तं यत् जीवने शिक्षकस्य उपस्थितिः पार्श्वसङ्गीतवत् भवति। यथा रङ्गमञ्चे पार्श्वसङ्गीतस्य उपस्थितिः न दृश्यते तथापि तस्मिन् सत्ये रङ्गमञ्चं सजीवं भवति। तथैव अस्माकं जीवनेऽपि प्रत्येकं स्थितौ शिक्षकस्य आवश्यकता भवति। अयञ्च शिक्षकः भिन्नभिन्नरूपेण भवितुमर्हति। शिक्षकः स्वशिष्यस्य जीवने धैर्यं विश्वासं कौशलवर्धनं सम्पोषयति येन सः स्वजीवने योग्यो नागरिको भवेत्। कस्यापि राष्ट्रस्य उन्नतिः तत्रत्यैः नागरिकैः भवति, तेषां योग्यानां नागरिकाणां निर्माणं शिक्षकः एव कर्तुं शक्नोति। स्वाम्यध्यात्मानन्देन एतदपि निगदितं यत् कश्चन शिक्षकः तदा एव योग्यः शिक्षकः भवितुमर्हति यदा स आत्मानं सर्वदा विद्यार्थी एव मन्येत। आदर्शः शिक्षकः आजीवनं विद्यार्थी भवति। नूतनज्ञानान्वेषणाय, शिष्यबुद्धिशुद्धिविकासाय, जगद्धिताय च सर्वदा तत्परो भवेत्। स्वव्याख्याने स्वामी अध्यात्मानन्दः दिव्यजीवनसङ्घस्य शिवानन्दाश्रमस्य च परिचयं सर्वेभ्यः प्रदाय उपस्थितान् सर्वान् योगविषयकं प्रात्यक्षिकं ज्ञानमपि प्रादर्शयत्। दिव्यजीवनसङ्घस्य गतिविधिविषये वदता स्वामिना एतदपि उक्तं यत् स्वजीवने सः एतावता पञ्चाशदधिकं रक्तदानम् अकरोत्। स्वामी अन्यान् अपि रक्तदानाय प्रेरितवान्।

अस्मिन्नवसरे कार्यक्रमस्य अध्यक्षत्वेन भाषमाणेन कुलपतिना प्रो. गोपबन्धुमिश्रेण उक्तं यत् विद्यार्थिनः जीवने यथा गुरोः महत्त्वं भवति, गुरुं विना विद्यार्थिजीवनं लक्ष्यविहीनं भवति तथैव विद्यार्थिनं विनाऽपि गुरौ गुरुत्वं नायाति। विद्यार्थी गुरुत्वस्य पूरकं भवति। गुरुशिष्ययोः एतादृशसम्बन्धसत्ये एव 'गुरोस्तु मौन व्याख्यानं शिष्यास्तु छिन्नसंशयाः' इत्यादिवचनं सार्थकतां भजते। अतः गुरुशिष्ययोः सम्बन्धः अपूर्वः विद्यते। कार्यक्रमस्य अन्ते स्वामिना अध्यात्मानन्देन विश्वविद्यालयपरिसरे वृक्षारोपणं विधाय तस्य वृद्धिपर्यन्तं संरक्षणस्य दायित्वं स्वीकृतम्। अस्मिन् वृक्षारोपणकार्यक्रमे विश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धुमिश्रः, कुलसचिवः डॉ. दशरथजादवः, अनुस्नातकविभागाध्यक्षा प्रो. अर्चनाकुमारीदुबे, अन्ये च प्राध्यापकाः, छात्राश्च उपस्थिताः आसन्।



विश्वविद्यालयपरिसरे वृक्षारोपणं कुर्वन् स्वामी अध्यात्मानन्दः

Report Source: **SOMJYOTI**- University Newsletter (Issue: 20-21, page no. 24)